**दिनाङ्क** :- 22.08.2026

**प्रात**: - 06:55

**अथवार्ताः**

**प्रधानमन्त्री - आर्थिकमञ्चम्**

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् परिष्काराः तस्य प्रशासनस्य कृते बाध्यता न, अपितु प्रतिबद्धता दृढविश्वासश्च। तेन उक्तं यत् प्रशासनस्य नीतयः जनकल्याणपराः, विकासोन्मुखाः प्रगतिवर्धकाश्च सन्ति। ह्यः सायङ्काले नवदिल्ल्याम् इकोनॉमिक् टाइम्स् वर्ल्ड् लीडर्स् फोरम् इत्येतत् मञ्चं सम्बोधयन् श्रीमोदी उक्तवान् यत् तस्य प्रशासनेन परिष्कारेभ्यः स्पष्टा योजना निर्मिता अस्ति, यस्यां प्राथमिकता शासनस्तरीय-परिष्कारेभ्यः प्रदत्ता अस्ति। सः उक्तवान् यत् देशस्य भविष्यं सुरक्षितं कर्तुं भारतं नीतिनिर्माणस्तरे नवपरिष्कारान् करोति।

प्रधानमन्त्री उक्तवान् यत् तस्य प्रशासनं केवलं नियमेषु परिवर्तनं न करोति, अपितु तेषां नियमानां पृष्ठे विद्यमानायाः सम्पूर्णदृष्टेः परिवर्तनम् अपि करोति। सः उक्तवान् यत् पूर्वं नियमसम्बद्ध-दृष्टिः "अनुमतिपर्यन्तं निषिद्धम्" इति आसीत्, अधुना च प्रशासनं तां दृष्टिं परिवर्त्य "निषेधपर्यन्तम् अनुमतम्" इति दिशि अग्रे सरति।

**ब्रिक्स् - पर्यटनमन्त्रिणां सभा**

भारतस्य अध्यक्षतायाम् आयोजितं ब्रिक्स्-पर्यटनमन्त्रिणाम् उपवेशनं ह्यः जयपुरघोषणापत्रं सर्वसम्मत्या स्वीकरणेन सम्पन्नम्। एतत् घोषणापत्रं ब्रिक्स्-सदस्यदेशानां मध्ये पर्यटनक्षेत्रे सहयोगं सुदृढीकर्तुं कार्ययोजना प्रददाति। घोषणापत्रे सहयोगस्य प्रमुखक्षेत्राणि निर्दिष्टानि सन्ति। एतेषु पर्यटनक्षेत्रे कृत्रिमबुद्धेः उपयोगः, स्थायिपर्यटन-पद्धतयः, कौशलविकासः, अबाधितयात्रायाः सौविध्यानि च सम्मिलितानि सन्ति। उपवेशनस्य अध्यक्षतां केन्द्रीयसंस्कृतिपर्यटनमन्त्री गजेन्द्रसिंहशेखावतः राजस्थानस्य जयपुरे अकरोत्। अनेन सहैव अस्मिन् वर्षे भारतस्य अध्यक्षतायाम् आयोजितस्य ब्रिक्स्-पर्यटनकार्यसमूहस्य अपि समापनम् अभवत्।

**<u>पश्चिमबङ्गालः - अमितशाहः</u>**

केन्द्रीयगृहमन्त्री अमितशाहः पुनरुक्तवान् यत् अवैधप्रवासिनां विरुद्धं शून्यसहिष्णुतानीतिः निरन्तरं प्रवर्तिष्यते तथा अवैधप्रवासिनां परिचय-निष्कासन-निर्वासनसम्बद्धा प्रक्रिया कठोरतया क्रियान्विता भविष्यति। असौ उक्तवान् यत् देशात् प्रत्येकस्य अवैधप्रवासिनः निर्वासनं प्रति प्रशासनस्य प्रतिबद्धता सर्वोच्च-प्राथमिकता अस्ति। असौ एतदपि उक्तवान् यत् जनसाङ्ख्यिकीय-परिवर्तनं पूर्णतया निरोद्धुं प्रयत्नः करिष्यते। गृहमन्त्री ह्यः पश्चिमबङ्गालस्य सिलीगुडी-नगरे कावाखाली-प्राङ्गणे भारतीयन्याय-संहितायाः विषये षड्दिवसीय-अवबोधनप्रदर्शनीम् उद्घाट्य एकां सभां सम्बोधयन् एतत् उक्तवान्।

**<u>राष्ट्रपतिः - शिक्षकपुरस्कारः</u>**

राष्ट्रपतिः द्रौपदीमुर्मुः आगामिमासस्य पञ्चमदिनाङ्के नवदिल्ल्यां स्थिते विज्ञानभवने अष्टचत्वारिंशत्-विद्यालयीय-शिक्षकेभ्यः राष्ट्रियशिक्षकपुरस्कारान् प्रदास्यति।

शिक्षामन्त्रालयेन सूचितं यत् विद्यालयीय-शिक्षकाणां चयनं जनपदस्तरे, राज्यस्तरे अथ राष्ट्रियस्तरे च विद्यालयशिक्षा-साक्षरताविभागेन त्रिचरणात्मकचयनप्रक्रियया कृतम्। चयनिताः अष्टचत्वारिंशत्-शिक्षकाः सप्तविंशति-राज्येभ्यः, सप्त केन्द्रशासितप्रदेशेभ्यः अथ केन्द्रप्रशासनस्य षड्-संस्थाभ्यः च सन्ति। चयनितेषु अष्टचत्वारिंशत्-शिक्षकेषु षड्विंशतिः पुरुषाः द्वाविंशतिः च महिलाः सन्ति।

**<u>ऋतुविभागः</u>**

भारतर्तुविज्ञानविभागेन अद्य पूर्वमध्यप्रदेशे प्रचण्डात् अतिप्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति। असम-सिक्किम-मेघालय-नागालैण्ड-मणिपुर-मिजोरम-त्रिपुरा-राज्येषु सोमवासरपर्यन्तं प्रचण्डवृष्टेः सम्भावना वर्तते। अद्य दिल्ली-पञ्जाब-हरियाणा-बिहार-छत्तीसगढ-पूर्वोत्तरप्रदेश-ओडिशा-उत्तराखण्ड-हिमालयीयप्रदेशानां केषुचित् भागेषु अपि समानस्थितेः सम्भावना वर्तते।

**।। <u>इति वार्ताः</u>।।**